# सुरवाणीसमाराधकेभ्यः स्वागतम्



डा. कं.कादम्बिनी
सहायकाचार्या
रा. सं. विद्यापीठम्, तिरुपतिः

# विभक्तयः

- सामान्यतया भाषायां सप्तविभक्तयः भवन्ति ।
- प्रथमा, सम्बोधनप्रथमा, द्वितीया, तृतीया, चतुर्थी, पञ्चमी, षष्ठी, सप्तमी च।
- वाक्ये विभक्त्यन्तानां नामपदानां, तिङन्तस्य क्रियापदस्य च प्रयोगः क्रियते।

# वाक्ये

- क्रियासूचकं पदं क्रियापदम्।
- कर्तृसूचकं पदं कर्तृपदम्।
- कर्मसूचकं पदं कर्मपदम्।

# प्रथमाविभक्तिः

- प्रातिपदिकार्थमात्रे, लिङ्गमात्राद्याधिक्ये, संख्यामात्रे च प्रथमाविभक्तिः भवति।

- कर्तरिप्रयोगे कर्तुः प्रथमाविभक्तिः भवति।

- कर्मणिप्रयोगे कर्मणः प्रथमाविभक्तिः भवति।

# सम्बोधनप्रथमाविभक्तिः

# सम्बोधने (आह्वाने) सम्बोधनप्रथमाविभक्तिः

- यदा यं कमपि वयं आह्वयाम तदा सम्बोधन-प्रथमाविभक्तिः भवति।
- यथा

हे राम ! अत्रागच्छ।

हे रमे ! कुत्रास्ति भवती ?

| प्र. वि. | सम्बोधनरूपम् | प्रथमाविभक्तितः भेदः |
|---|---|---|
| रामः | राम ! | सन्बोधने विसर्गः न दृश्यते। |
| गोविन्दः | गोविन्द ! | सन्बोधने विसर्गः न दृश्यते। |
| मित्रम् | मित्र ! | सन्बोधने मकारः न दृश्यते। |
| सीता | सीते ! | सम्बोधने अन्ते 'ए' कारः। (प्रथमायां तु 'आ' कारः।) |
| मान्या | मान्ये ! | - " - |
| गौरी | गौरि ! | सम्बोधने ईकारस्य ह्रस्वः। |
| भगिनी | भगिनि ! | - " - |
| लक्ष्मीः | लक्ष्मि ! | - " - (विसर्गस्य अश्रवणं च।) |
| अम्बा | अम्ब ! | सम्बोधने ह्रस्वः 'अ'कारः। |

# धन्यवादाः